Knowledge Consortium of Gujarat
Department of Higher Education - Government of Gujarat
Journal of Humanity
ISSN: 2279-0233

Continuous Issue-15 | November 2014 - January 2015

# मध्यमव्यायोगे निर्दिष्टानि सांस्कृतिकमूल्यानि।

आदिकालात् रामायणम् आदर्शः महाभारतच्च वास्ताविकं ग्रंथं वयं मन्यामहे। त्तत्रापि महाभारतार्थं तु उक्तं यत् "भारतं पञ्चमो वेदः।" महाभारत- मनेकानां साहित्यानां संग्रहः वर्तते । अस्मिन् ग्रन्थे आख्यानुपाख्यानञ्च वर्तते । अनेन ग्रन्थोऽयं बहूनां साहित्यकग्रंथानामुपजीव्यं वर्तते ।लौकिक संस्कृत साहित्ये अस्य ग्रन्थस्य महत्प्रभावः दृश्यते। महामहिमराजशेखराचार्येण तु कथितं यत्- 'नास्तिऽचौरः कविजनः'। अनेन न्यायेन पश्यामञ्चेत् ज्ञायते यत् महाकवि भासोऽपि महाभारतमाधारीकृत्य केचनानां रुपकाणां रचनामकरोत्।

महाकविभासेन कृतानां स्वनानाम् परिशीलनेन इदं तु स्पष्टतया वक्तुं शक्यते यत् प्रत्येकस्य लेखकस्योपरी पूर्वतनस्य साहित्य प्रभावः, तत्कालिन् समाजस्य संस्कृतेः च प्रभावः दृश्यते एव । अस्य साहित्यस्य प्रमुखं लक्ष्यं वर्तते यत् सामान्य मनुष्योऽपि सरलतया वैदिकवाङमयस्य भेदं विज्ञाय जीवनं संस्कारं कृत्वा च मुक्तिं प्राप्नुयात् । अनेनैवोदेश्येन महाभारतादि ग्रन्थाः सरलशैल्यां लिखिताः सन्ति। येन समाजस्य विश्वस्य वा प्रत्येकः जनः अस्य ग्रन्थस्य अध्ययनेन धर्माचरणं कुर्यात् ।

महाभारते हिडिम्बवधपर्वणि नवमे अध्याये हिडिम्बवधस्य वृतान्तः विध्यते । एनं वृतान्तमाधारीकृत्य महाकविभासेन 'मध्यमव्यायोगः' इति रूपकं रचितम् । मया शोधपत्रेऽस्मिन् मध्यमव्यायोगे निर्दिष्टानां सांस्कृतिकमूल्यानामवलोकनं कर्तुं प्रयत्नः कृतोऽस्ति ।

वर्तमानकाले आधुनिककरणेन अस्माकं युवकाः सांस्कृतिकमूल्येभ्यः विमुखाः दरीदृश्यन्ते। समस्या इदं अन्धकारमयभावेः सूचनं करोति । अधुना समाजे वयं पश्यामः यत् जनाः परस्परं स्नेहभावेन, प्रेम्णा, आदरेण, सहृदयेन, एक्यैन च न व्यवहरन्ति । जनेषु स्नेहः, कारूण्यम्,आदरः, सत्कारः, समदृष्टिः, सद्भावञ्चेत्यादयाः सद्गुणाः शेषमानाः सन्ति।

अस्माभिः इयं समस्यां निवारयितुं यत्नः कर्तव्यः। केनचित प्रकारेणापि जनेषु सत्य, अहिंसा, प्रेम, सद्भावः, प्रामाण्यम्, कारूण्यञ्चेत्यादयाः सद्गुणाः पुनरानेतव्याः । जनाः एतेषां सन्मूल्यानां प्रति कथञ्चिदपि सन्मुखाः भवेयुः। एतेषां मूल्यानां कृते प्रत्येकं जनं प्रोत्साहितं कर्तुं यत्नः कर्तव्यः।सन्मूल्यानि आचरितुं व्यक्तिना पूर्वं तु आत्मशोधनं कर्तव्यम्।

पूर्वैभिः ऋषिभिः उपदिष्टानां मानवमूल्यानां प्रतिबिम्बं संस्कृतसाहित्ये विद्यते। संस्कृतसाहित्याधारेण वर्तमानकालिन युवकं सन्मूल्यानां दिशानिर्देशं कर्तुं मया शोधपत्रमयं लिखितमस्ति। साम्प्रतेषु युवकेषु सन्मूल्यानां पुनर्स्थापन भवेत् तदेव ममोदेश्यः ज्ञेयः ।

मध्यमव्यायोगस्य परिशीलनेन ज्ञायते यत् अत्र निर्दिष्टाः ब्राहमणाः गोत्र, शाखा आदिभिः शब्दैः निर्दिष्टाः सन्ति । इमे द्विजाः उपनयनं धारयन्ति स्म । 'भो' इति शब्दोश्चारणादस्य ब्राह्मणत्वं विदितं भवति। यथा 'भोः शब्दोञ्चारणादस्य ब्राहमणोऽयं न संशयः।'1 इमे ब्राहमणाः विद्वांसः, वेदज्ञाः, शीलगुणाञ्चासन् ।

यथा- 'ब्राहमणः श्रुतवान् वृध्दः, पुत्रं शीलगुणान्वितम् ।

पुरूषादस्य दत्वाहं कथं निवृतिमाप्नुयाम्।'2

इमे द्विजाः पृथिव्यां पूजनीयाः आसन्।3 सर्वेष्वप्यपराधेषु इमे अवध्याः न दण्डनीयाः च आसन् उक्तं यत् सर्वापराधेऽवध्यत्वान्मुच्यतां द्विजसत्तमः।4

क्षत्रियाणां सम्पतिः शौर्यम् आसीत्। शौर्येण सञ्चितं द्रव्यम् इमे क्षत्रियाः न संगृह्णान्ति किन्तु ब्राहमणेभ्यः ददति स्म् । अपि च स्वापत्यानां कृते धनुषबाणं रक्षन्ति स्म । इत्येव तेषां धर्मः आसीत्। तत्कालीन् क्षत्रियेषु शौर्यम्, धृतिः, विनयम्, दया, माधुर्यं, युध्दे

पराक्रम: चेत्यादया: सद्गुणा: प्रमुखा: आसन् । क्षत्रिया: सर्वान् प्रजाजनान् 'पुत्र:' इति शब्देन सम्बोधयति स्म। इति तेषां वैशिष्ट्यमासीत् यथोक्तं यत् -'सर्वा: प्रजा: क्षत्रियाणां पुत्रशब्देनाभिधीयन्ते।'5

एकस्मिन् संवादे भीमेनोक्तं यत् मदर्थे ब्राह्मणा: खलु पूज्यतमा: यद्यपि क्षत्रियोऽहम्। मे शरीर विपर्येण ननु ब्राह्मणोऽयं रक्षामि।

यथा- 'क्षत्रियकुलोत्पन्नोऽहम्। पूज्यतमा: खलु ब्राह्मणा:।' 6

अनेन विवेचनेन ज्ञायते यत् तस्मिन् काले ब्राह्मण: पूजनीया: आसन्। यद्यपि ब्राह्मणानाम् उपरी यदा कदा संकटमापतति तदानीं भीम: सद्दशा: क्षत्रिया: तेषां रक्षणं कुर्वन्ति स्म । मध्यमव्यायोगे भीमसद्दशस्य पात्रस्य उदात्तभावस्य दर्शनं भवति ।

मध्यमव्यायोगे महाकवि भासेन पाण्डवा: युध्यप्रिया:, शरणागतवत्सला:, दीनपक्षणतिन: निर्दिष्टा: सन्ति । घटोत्कच: यदा भीमं प्रति आधानं करोति तदा भीम: तं प्रतिभाषते यत् 'त्वं ब्राह्मणकुटुम्बं विमुच्य मां नय्।' एवं क्षत्रिया: गोब्राह्मणानां रक्षका: आसन्। इदमत्र भीमेन सार्थकं कृतम्।

प्रसंगेऽस्मिन् भीमस्य पात्रे वचनमूल्यस्य दर्शनं भवति। भीम: प्रकृत्या यावत् युद्यप्रिय:, पराक्रमी, शौर्योध्दत्तञ्च आसीत् तावदेव वचनबध्द क्षत्रियोऽपि लक्ष्यते। भीम: घटोत्कचं भाषते यत् ब्राह्मणपुत्रमध्यमस्य स्थाने अहं त्वया सह आगमिष्ये। किन्तु पञ्चात् भीमेन ज्ञातं यत् अयं खलु हिडिम्बाया: पुत्रोऽस्ति तदा कृत्रिमे युध्दे तं पराजयति किन्तु घटोत्कच: भीमं यदा स्मारयति यत् 'भो: पुरूष ! पूर्व समयं स्मर।'7 एतच्छुत्वा भीम: स्वेच्छया तेन सह याति।

महाकविना भासेन मध्यमव्यायोगे घटोत्कचं 'राक्षसाग्नि:'कथितोऽस्ति। तथापि घटोत्कचे वरिष्ठानां प्रति आदरभावादि दृश्यते यथा-

1. मातुर्नियोगादपनीय शंकाम्।8मातु: आज्ञया असौ ब्राह्मणकुटुम्बम्अवरोधयति । अत: असौ आज्ञांकित: मातृभक्त: अस्ति ।
2. यद्यपि ब्राह्मणा: पूज्यतमा: पृथिव्यां किन्तु तथापि केवलं मातु: आज्ञया असौ अयमकार्यं कर्तुं यतते।
3. घटोत्कच: अनायसेनैव भीमस्य तुलना शिव:, कृष्ण:, इन्द्र:, यम: सद्दश: गणयति। यथा- 'विश्वकर्ता शिव:, कृष्ण:,शक्र:, शक्तिधरो यम:।'9इदं श्रुत्वा भीमघटोत्कचं प्रतिभाषते यत् इदं खलु अलिकम्। तदानीं घटोत्कचेनापि प्रतिभाषितं यत् 'कथं कथमनृतमित्याह। क्षिपसि मे गुरूम्?'घटोत्कचस्य अनेन संवादेन ज्ञायते यत् असौ खलु वरिष्ठं सन्मानयति। यदा ब्राह्मणपुत्र मध्यम: घटोत्कचेन सह गन्तुं सिद्धो भवति तदानीमपि असौ भाषते यत् 'अहो ! ब्राह्मणबटो: स्वजनवात्सल्यम् ।' घटोत्कचस्य वाक्येऽस्मिनपि गुरूवंदनाया: दर्शनं भवति ।

यदा घटोत्कच: मध्यमपुत्रमाहवयितुं ब्राह्मणं केशवदासं आदिशति तदा घटोत्कचस्य भाषणमिदं ब्राह्मणं अतिराक्षसी भाषते। किन्तु तदानीमेव घटोत्कच: अंगिकरोति यत् ननु मे प्रकृतिदोषऽयं यथा 'अयं मे प्रकृतिदोष:।' स्वकीय स्वभाव अंगीकरणेऽत्र तस्य विनम्रताया: दर्शनं भवति।

घटोत्कच: मध्यमं मोचयितुं भीमस्य कथनं न अंगीकरोति सरलतया एष: भीमं भणति यत् -'मुच्यतामिति विस्त्रब्धं ब्रवीति यदि मे पिता।'10 घटोत्कचस्य वाक्येऽस्मिन् उध्दताया: दर्शनं भवति। किन्तु भीम: पञ्चात् कथयति यत्- 'अहो गुरूशुश्रूष: खल्वयं तपस्वी।'यदा मातु: हिडिम्बाया: सकाशात् तेन प्रतिज्ञायते यत् बलवानोऽयं खलु मे पिता तदानीं घटोत्कच: विनयी भूत्वा कथयति यत्

'अज्ञानास्तु मया पूर्वं यद् भवान्नाभिवादित: ।
अस्य पुत्रापराधस्य प्रसादं कर्तुमर्हसि।'11

भीम: तं मातु: स्थानं बोधयन् वदति यत् 'माता किल मनुष्याणां देवतानां च दैवतम्।' अनेन संवादेन ज्ञायते यत् तस्मिन्काले मातु: स्थानं समाजे देवतुल्यं स्यात्। कथनमिदं घटोत्कचस्य व्यवहारेण भीमस्योद्‌गारेण चाभिज्ञायते।

मध्यमव्यायोगे केशवदासोऽपि विकट परिस्थिति निवारक:,व्यवहारकुशल:, अनुभवी च प्रतिभाति। घटोत्कच: यदा तेषु ब्राह्मणेषु कोऽपि एकं याचते तदानीं प्रप्रथमं सैव तेन सह गन्तुकामो भवति ।असारयुक्तसंसारे असौ सर्वेभ्य: कर्मेभ्य: निवृत्य इदानीं कुटुम्बवरिष्ठभावेन आत्मबलिदानेन च स्वपरिवारं रक्षितुम् अत्युत्सुक: दृश्यते। केशवदासस्य इदमात्मसमर्पणं परिवारस्य वरिष्ठयोग्यं दृश्यते । घटोत्कच: यदा मध्यमपुत्रविषयकं तं पृच्छति तदानीं पुत्ररक्षक पितु: आत्मा क्षणमपि विलम्ब्य घटोत्कचं प्रतिभाषते यत् -

'अति राक्षसं खलु ते वचनम्।'12

वाक्येऽस्मिन् केशवदासस्य पुत्रप्रेम: स्पष्टतया दरीदृश्यते।

यदा ब्राह्मण: स्वात्मानं राक्षसरूप वह्नौ क्षिपितुं सिद्धौ भवति तदानीं ब्राह्मणपत्नि भाषते यत् 'पतिमात्रधर्मिणी पतिव्रतेति नाम।' ब्राह्मणपत्नि वदति यत्सांसारिक धर्मपथि अहं सर्वासु परिस्थितिसु पतिना सह आसम्। अधुना मम बलिदानेन भवतां परिवारस्य च रक्षणं कर्तुमिच्छामि। अत्र ब्राह्मणपत्न्या: बलिदानार्थम् औत्सुक्यं दृष्ट्वा घटोत्कच: ब्राह्मणभार्यां भाषते यत् - 'न खलु स्त्रीजनोऽभिमतस्तत्रभवत्या।' घटोत्कचस्य अनेन संवादेन ज्ञायते यत् तस्मिन्काले स्त्रीणां वध: न भवति स्म। यदा बलिदानार्थं ज्येष्ठपुत्र: बलिदानार्थं सिध्दो भवति। तदानीं तेनोक्तं –

'मम प्राणैर्गुरूप्राणानिच्छामि परिरक्षितुम्।
रक्षणार्थे कुलस्यास्य भोक्तुमर्हति मां भवान्।'13

अपि च इदमपि वदति यत् –

'आपदं हि पिता प्राप्तो ज्येष्ठपुत्रेण तार्यते ।
ततोऽहमेव यास्यामि गुरूणां प्राणरक्षणात् ।'14

यदा पिता कष्टमापतति तदानीं पुत्र: पितु: रक्षणार्थं पूर्वं तिष्ठति । एवं तस्मिन् काले ज्येष्ठपुत्र: वा पुत्रा: कर्तव्यनिष्ठा: आसन् । पितु: रक्षणार्थं कनिष्ठ: पुत्रोऽपि सिध्दो भवति । यथा - 'कित्यां तव परिष्वक्ता भविष्यति वसुन्धरा।'इति कथित्वा आर्शीवचनं ददाति। एवमत्र कनिष्ठे पुत्रेऽपि आत्मसर्मपणस्य बलिदानस्य च भाव: दृश्यते । कनिष्ठपुत्रस्य मते ज्येष्ठभ्राता पिता तुल्य: ज्ञेय: । अत: ज्येष्ठानां रक्षणं मे कर्तव्यम् । यथा-

'ज्येष्ठो भ्राता पितृसम: कथितो ब्रह्मवादिभि: ।
ततोऽहमेव यास्यामि गुरूणां प्राणरक्षणात् ।'15

अपि च कनिष्ठमतेन संसारेऽस्मिन् ज्येष्ठैव कुले श्रेष्ठ: सैव मातपितृभ्य: प्रिय:। यथा-

'ज्येष्ठ: श्रेष्ठ: कुले लोके पितृणां च सुसंप्रिय:।
ततोऽहमेव यास्यामि गुरूवृत्तिमनुस्मरन् ।' 16

एतत् सर्वं श्रुत्वा मध्यम पुत्र: भणति यत् ज्येष्ठपुत्र: पित्रे प्रिय: कनिष्ठञ्च मात्रे उभयो: अहं काभ्यां प्रिय: ? यथा-

'पित्रोरनिष्ट: कस्येदानीं प्रिय: ?'17

इत्युक्त्वा असौ स्वां धन्यं मन्यते यतोहि तस्य आत्मसमर्पणेन समग्र परिवारस्य रक्षणमभवत्। असौ वदति यत् –

'धन्योऽस्मि यद् गुरूप्राणा: स्वै: प्राणै: परिरक्षिता:।
बन्धुस्नेहाध्दि महत: कालस्नेहस्तु दुर्लभ: ॥'18

श्लोकेऽस्मिन् मध्यमपुत्रस्य दयनीय स्थिते: दर्शनं भवति । पित्रा ज्येष्ठपुत्र: प्रिय: कृत: मात्रा च कनिष्ठ: । प्रसंगेऽस्मिन् संसारस्य स्वार्थवृते: दर्शनं कारयित्वा महाकविना भासेन सभ्यताप्रियेण सभ्यताया: नूतनमालेखनं कृतमस्ति।

**निष्कर्ष:**

अनेन शोधपत्रेण इदं स्पष्टं भवति यत् जनेषु नम्रता, शीलम्, प्रसन्नता, धैर्यम् चेत्यादिनां गुणानां विकास: भवति एवमेव सांस्कृतिक मूल्यानि अपि यथा सदाचार:, सद्विचार:, सत्यता,शिष्टाचार:इत्यादिनां सद्मूल्यानां संवर्धनमपि भवति । भारतीय संस्कृतौ सेवाधर्म: परमोधर्म: कथितोऽस्ति यथा -'सेवाधर्मो

परमगहनो योगीनामपिऽगम्यम्।' समाजे प्रत्येकस्य जनस्य कर्तव्यं भवति यत् वरिष्ठानाम्, मातपितृणाम्, पशुपक्षिणाञ्च रक्षणं करणीयम्। अस्य भावनाया: दर्शनं शोधपत्रेऽस्मिन् भवति।

समाजे ब्राह्मणस्य स्थानं उच्चतमम् पूज्यतमञ्च आसीत् । ब्राह्मणानां सर्वेऽपराधाः क्षम्याः आसन्। क्षत्रियाः स्वधर्माचरणार्थं संस्कृतेः रक्षणार्थं सर्वथा सर्वदा सिध्दाः आसन्। दुष्टेषु जनेषु अपि कारूण्य भावा:आसन्।

मध्यमव्यायोगे वयं पश्यामः यत् ब्राह्मण परिवारः आत्मसर्मपणार्थं सिध्दः अभवत् तदानीं घटोत्कचस्य मुखात् शब्दाः निर्गच्छन्ति यत् वृध्दः स्त्रियञ्च अवध्याः। वाक्यमिदं ज्येष्ठस्य स्त्रीणाञ्च वधनिषेधं सूचयति। पतिव्रताणां स्त्रीणां कृते पत्येव तासां धर्मः आसीत्। पत्युः कृते स्वसर्मपणम्, जीवनस्य बलिदानम्एतत्सर्वं स्त्रीणां कृते इष्टतमासीत्।

घटोत्कचः राक्षसः सन् ब्राह्मणान् प्रति दयावान् आसीत् । एवं मध्यमव्यायोगस्य परिशीलनेन ज्ञायते यत् रूपकेऽस्मिन् महाकवि भासेन समाजस्य कृते अत्यावशकानि जीवनमूल्यानि निर्दिष्टानि सन्ति।

+धनसुरा पीपल्स को. ओ. बेक लि. आर्ट्स तथा कोमर्स कोलेज, धनसुरा (गुजरात) केद्वाराआयोजित "संस्कृत साहित्ये रामायण च महाभारतौ भारतीय सांस्कृतिकमूल्यानि।" विषयक नेशनल सेमिनार दि. 9जनवरी, 2014प्रस्तुत आलेख

**संदर्भग्रन्थाः-**


1. भासनाटकचक्र- महाभारत, प्रा. सी. एल. शास्त्रीविगेरे, प्रका. सरस्वती
2. पुस्तक भंडार,अहमदावाद, मध्यमव्यायोग, श्लोक:-2
3. द्रष्टव्य,श्लोक:-13
4. द्रष्टव्य, श्लोक:-9
5. द्रष्टव्य, श्लोक:-34
6. मध्यमव्यायोगः, भास,संपा. डॉ. महेश ए. पटेल, प्रका. नीरव प्रकाशन, कालुपुर, अमदावाद, पृ. 68
7. द्रष्टव्य, पृ. 68
8. द्रष्टव्य, पृ. 72
9. द्रष्टव्य, श्लोक:-9
10. द्रष्टव्य, श्लोक:-43
11. द्रष्टव्य, पृ. 66
12. द्रष्टव्य, श्लोक:-51
13. द्रष्टव्य, पृ. 60
14. द्रष्टव्य, श्लोक:-16
15. द्रष्टव्य, श्लोक:-19
16. द्रष्टव्य, श्लोक:-18
17. द्रष्टव्य, श्लोक:-17
18. द्रष्टव्य, पृ. 56
19. द्रष्टव्य, श्लोक:- 20


**************************************************


**डॉ. बलाभाई एस. रबारी,**
**संस्कृत विभागाध्यक्ष,**
**श्रीमती आर. डी. शाह आटर्स & श्रीमती वी. डी. शाह कोमर्स कोलेज,**
**धोलका जि. अहमदावाद-382225**


Copyright © 2012 - 2016 KCG. All Rights Reserved. | Powered By : Knowledge Consortium of Gujarat